✵श्रीगणपति अथर्वशीर्ष✵

श्री गणेशाय नमः

ॐ भद्रं कर्णेभि श्रृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरै रंगै स्तुष्टुवां सहस्तनुभिः व्यशेम देवहितं यदायुः ।।
ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति न स्तार्क्ष्र्यो अरिष्ट नेमिः स्वस्ति नो बृहस्पतिर्दधातु ।।

ॐ शांतिः । शांतिः ।। शांतिः ।।।

ॐ नमस्ते गणपतये-त्वमेव प्रत्यक्षं तत्वमसि-त्वमेव केवलं कर्ताऽसि-
त्वमेव केवलं धर्ताऽसि-त्वमेव केवलं हर्ताऽसि-त्वमेव सर्वं खल्विदं
ब्रह्मासि-त्व साक्षादात्माऽसि नित्यम् ।
ऋतं वच्मि । सत्यं वच्मि । अव त्व मां । अव वक्तारं ।
अव श्रोतारं । अव दातारं । अव धातारं । अवानूचानमव शिष्यं ।
अव पश्चातात । अव पुरस्तात । अवोत्तरात्तात । अव दक्षिणात्तात् ।
अवचोर्ध्वात्तात् ।। अवाधरात्तात् ।।
सर्वतो माँ पाहि-पाहि समंतात् । त्वं वाङ्मयस्त्वं चिन्मयः ।
त्वमानंदमसयस्त्वं ब्रह्ममयः । त्वं सच्चिदानंदाद्वितीयोऽषि ।
त्वं प्रत्यक्षं ब्रह्माषि । त्वं ज्ञानमयो विज्ञानमयोऽषि ।
सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति ।
सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति ।
त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारिकाकूपदानि ।
त्वं गुणत्रयातीतः त्वमवस्थात्रयातीतः । त्वं देहत्रयातीतः ।

त्वं कालत्रयातीतः। त्वं मूलाधारस्थितोऽसि नित्यं। त्वं शक्ति- त्रयात्मकः।
त्वां योगिनो ध्यायंति नित्यं। त्वं ब्रह्मा त्वं विष्णुस्त्वं रूद्रस्त्वं इंद्रस्त्वं
अग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चंद्रमास्त्वं ब्रह्मभूर्भुवःस्वरोम्।
गणादि पूर्वमुच्चार्य वर्णादिं तदनंतरं। अनुस्वारः परतरः। अर्धेन्दुलसितं।
तारेण ऋद्धं। एतत्तव मनुस्वरूपं। गकारः पूर्वरूपं। अकारो मध्यमरूपं।
अनुस्वारश्चान्त्यरूपं। बिन्दुरूत्तररूपं। नादः संधानं। सँ हितासंधिः सैषा
गणेश विद्या। गणकऋषिः निचृद्गायत्रीच्छंदः। गणपतिर्देवता।
ॐ गं गणपतये नमः।
एकदंताय विद्महे। वक्रतुण्डाय धीमहि। तन्नो दंती प्रचोदयात।
एकदंतं चतुर्हस्तं पाशमंकुशधारिणम्।
रदं च वरदं हस्तैर्विभ्राणं मूषकध्वजम्।
रक्तं लंबोदरं शूर्पकर्णकं रक्तवाससम्।
रक्तगंधाऽनुलिप्तांगं रक्तपुष्पैः सुपुजितम्।।
भक्तानुकंपिनं देवं जगत्कारणमच्युतम्।
आविर्भूतं च सृष्टयादौ प्रकृते पुरुषात्परम्।
एवं ध्यायति यो नित्यं स योगी योगिनां वरः।
नमो व्रातपतये। नमो गणपतये। नमः प्रमथपतये। नमस्तेऽस्तु-
लंबोदरायैकदंताय। विघ्ननाशिने शिवसुताय। श्रीवरदमूर्तये नमो नमः।
एतदथर्वशीर्ष योऽधीते। स ब्रह्मभूयाय कल्पते-स सर्व विघ्नैर्नबाध्यते।
स सर्वतः सुखमेधते। स पञ्चमहापापात्प्रमुच्यते।

सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायंप्रातः प्रयुंजानोऽपापो भवति। सर्वत्राधीयानोऽपविघ्नो भवति। धर्मार्थकाममोक्षं च विंदति।

इदमथर्वशीर्षमशिष्याय न देयम्। यो यदि मोहाद्दास्यति स पापीयान् भवति। सहस्रावर्तनात् यं यं काममधीते तं तमनेन साधयेत्। अनेन गणपतिमभिषिंचति स वाग्मी भवति ।

चतुर्थ्यामनश्नन जपति । स विद्यावान भवति। इत्यथर्वणवाक्यं।

ब्रह्माद्यावरणं विद्यात् न बिभेति कदाचनेति। यो दूर्वांकुरैंर्यजति-

स वैश्रवणोपमो भवति।

यो लाजैर्यजति स यशोवान भवति स मेधावान भवति। यो मोदक-

सहस्रेण यजति स वाञ्छित फलमवाप्रोति।

यः साज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते।

अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति।

सूर्यग्रहे महानद्यां प्रतिमासंनिधौ वा जप्त्वा सिद्धमंत्रों भवति।

महाविघ्नात्प्रमुच्यते। महादोषात्प्रमुच्यते। महापापात् प्रमुच्यते।

स सर्वविद्भवति से सर्वविद्भवति। य एवं वेद इत्युपनिषद्।

ॐ शान्तिः शान्तिः शान्तिः ।